जयाङ्गा, स्त्री, (जयस्य आङ्गा आख्या याङ्गा यस्याः ।) भद्रदन्तीवृक्षः । इति राजनिर्घण्टः ॥

जयी, [न्] त्रि, (जेतुं शीलमस्य । जि+"जिदृक्षिविश्रीति ।" ३ । २ । १५७ । इति इनिः ।) जययुक्तः । विजयी । यथा,—

"जगति जयिनो यस्य विशिखाः ।"

इति महिम्नः स्तोत्रम् ॥

(यथा, च रघौ । ४ । ३४ ।

"पौरस्त्यानेवमाक्रामंस्तांस्तान् जनपदान् जयी । प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥")

जय्यः, त्रि, जेतुं शक्यः । ("शकि लिङ् च ।" ३ । ३ । १७२ । इति शक्तौ यत् । गुणः । "क्षय्यजय्यौ शक्यार्थे ।"६ । १ । ८१ । इति । यान्तादेशः ।) जयकरणयोग्यः । इत्यमरः । २ । ८ । ७४ ॥ (यथा, शतपथब्राह्मणे । १४ । ४ । ३ । २४ ।

"सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्म्मणा ॥")

जरठः, त्रि, (जीर्य्यत्यनेनेति । जॄ वयोहानौ+ उणां १ । १०२ । सूत्रे बाहुलकात् जॄशमोरण्यठः इत्युज्ज्वलदत्तोक्तेरठः ।) कर्कशः । पाण्डुः । कठिनः । इति मेदिनी । ठे, १३ ॥ (यथा, माघे । ४ । २९ ।

"अयमतिजरठाः प्रकामगुर्व्वी-
रलघुविलम्बिपयोधरोपरुद्धाः ॥")

जीर्णः । इति हेमचन्द्रः ॥ (वृद्धः । यथा, भागवते । ६ । १ । २५ ।

"स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि ।
निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम् ॥"

परिणतः । यथा, माघे । ११ । १४ ।

"हिमरुचिररुणिम्ना राजते रज्यमानै-
र्जरठकमलकन्दच्छेदगौरैर्मयूखैः ॥")

जरायां पुं । इति विश्वः ॥

जरड़ी, स्त्री, (जॄ+बाहुलकात् अड़ । ततो गौरादित्वात् ङीष् ।) तृणविशेषः । तत्पर्य्यायः । गर्म्मोटिका २ सुनाला ३ जयाश्रया ४ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । सारकत्वम् । दाहरक्तदोषनाशित्वम् । रुच्यत्वम् । पशूनां दुग्धदातृत्वञ्च । इति राजनिर्घण्टः ॥

जरणं, क्ली, (जरयतीति । जॄष्+णिच्+ल्युः ।) हिङ्गु । कृष्णौषधी । जीर्णे, त्रि । इति शब्दरत्नावली ॥ (श्वेतजीरकः । पर्य्याया यथा,—

"अजाजी जरणं दीर्घं मागधी जीरकं सितम् ॥"

इति वैद्यकरत्नमालायाम् ॥)

जरणः, पुं, (जरयतीति । जॄष्+णिच्+ल्युः ।) जीरकः । (यथा,—

"जीरको जरणो जाजी कणा स्याद्दीर्घजीरकः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कृष्णजीरकः । सौवर्च्चललवणम् । इति शब्दरत्नावली ॥ कासमर्द्दः । इति राजनिर्घण्टः ॥

जरणा, स्त्री, (जरण+टाप् ।) कृष्णजीरकः । इति राजनिर्घण्टः ॥ (यथा, ऋग्वेदे ।१०।३७।६।

"भद्रं जीवन्तो जरणामशीमहि ॥")

जरणद्रुमः, पुं, (जरणो जीर्णः द्रुमः ।) अश्वकर्णवृक्षः । इति राजनिर्घण्टः ॥

जरण्डः, त्रि, (जीर्य्यतीति । जॄ+अण्डन् ।) जीर्णः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

जरत्, त्रि, (जॄ+अतृन्) वृद्धः । इत्यमरः ।२।६।४२॥ पुरातनम् । इति हेमचन्द्रः ॥

जरत्कारुः, पुं, मुनिविशेषः । तत्पर्य्यायः । यायावरः २ । इति त्रिकाण्डशेषः ॥ (एतन्निरुक्तिर्यथा, महाभारते । १ । ४० । ३—४ ।

"जरेति क्षयमाहुर्वै दारुणं कारुसंज्ञितम् ।
शरीरं कारु तस्यासीत्तत् स धीमाञ्छनैः शनैः ॥
क्षपयामास तीव्रेण तपसेत्यत उच्यते ।
जरत्कारुरिति ब्रह्मन् ! वासुकेर्भगिनी तथा ॥"

एतद्विवरणं यथा, देवी भागवते ।२।१२।८-६ ।

"जरत्कारुर्मुनिः शान्तो न चकार गृहाश्रमम् ।
तेन दृष्टा वने गर्त्ते लम्बमानाः स्वपूर्ब्बजाः ॥
ततस्तमाहुः कुरु पुत्त्रदारान्
यथा च नः स्यात् परमा हि तृप्तिः ।
स्वर्गे प्रजामः खलु दुःखमुक्ता
वयं सदाचारयुते सुते वै ॥
स तानुवाचाथ लभे सनामा-
मयाचितां चातिवशानुगाञ्च ।
तदा गृहारम्भमहं करोमि
ब्रवीमि तथ्यं मम पूर्ब्बजा वै ॥
इत्युक्त्वा तान् जरत्कारुर्गतस्तीर्थान् प्रति द्विजः॥"

अथ मातृाभिशप्तो वासुकिः ब्रह्मोपदेशात् स्वभगिनीं जरत्कारुमेनमर्पयामास । तद्यथा, तत्रैव । २ । १२ । ३५—४५ ।

"वासुकिस्तु तदाकर्ण्य वचनं ब्रह्मणः शिवम् ।
वनं गत्वा सुतां तस्मै ददौ विनयपूर्ब्बकम् ॥
सनामां तां मुनिर्ज्ञात्वा जरत्कारुरुवाच तम् ।
अप्रियं मे यदा कुर्य्यात्तदा तां सन्त्यजाम्यहम् ॥
वाग्बन्धं तादृशं कृत्वा मुनिर्जग्राह तां स्वयम् ।
दत्त्वा च वासुकिः कामं भवनं स्वं जगाम ह ॥
कृत्वा पर्णकुटीं शुभ्रां जरत्कारुर्महावने ।
तया च सुखं प्राप रममाणः परन्तप ! ॥
एकदा भोजनं कृत्वा सुप्तोऽसौ मुनिसत्तमः ।
भगिनी वासुकेस्तत्र संस्थिता वरवर्णिनी ॥
न सम्बोधयितव्योऽहं त्वया कान्ते ! कथञ्चन ।
इत्युक्त्वा तु गतो निद्रां मुनिस्तां सुदतीं तदा ॥
रविरस्तगिरिं प्राप्तः सन्ध्याकाल उपस्थिते ।
किं करोमि न मे शान्तिस्त्यजेन्मां बोधितः पुनः ॥
धर्म्मलोपभयाद्भीता जरत्कारुरचिन्तयत् ।
नोचेत् प्रबोधयाम्येनं सन्ध्याकालो वृथा व्रजेत् ॥
धर्म्मनाशाद्वरं त्यागस्तथापि मरणं ध्रुवम् ।
धर्म्महानिर्नराणां हि नरकाय भवेत् पुनः ॥
इति सञ्चिन्त्य सा बाला तं मुनिं प्रत्यबोधयत् ।
सन्ध्याकालोऽपि सञ्जात उत्तिष्ठोत्तिष्ठ सुव्रत ! ॥
उत्थितोऽसौ मुनिः कोपात्तामुवाच व्रजाम्यहम् ।
त्वन्तु भ्रातृगृहं याहि निद्राविच्छेदकारिणी ॥
वेपमानाब्रवीद्वाक्यमित्युक्ता मुनिना तदा ।
भ्रात्रा दत्त्वा यदर्थं तत् कथं स्यादमितप्रभ ! ॥
मुनिः प्राह जरत्कारुं तदस्तीति निराकुलः ॥"

अस्य पुत्त्रः आस्तीकनामा मुनिप्रवरः । योऽसौ जनमेजयं गत्वा सर्पसत्रात् निवारयामास । जरत्कारुमुनेर्विशेषविवरणन्तु महाभारते आदिपर्व्वणि ४४—४८ अध्यायेषु द्रष्टव्यम् ॥)

जरत्कारुः, स्त्री, मनसादेवी । इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते । २ । १२ । ४७ ।

"मुनिः प्राह जरत्कारुं तदस्तीति निराकुलः॥ ")

जरत्कारुप्रिया, स्त्री, (जरत्कारोः स्वनामख्यातस्य मुनेः प्रिया ।) मनसादेवी । इति शब्दरत्नावली ॥

जरती, स्त्री, (जरत्+"उगितश्च ।"४ । १ । ६ । इति ङीप् ।) वृद्धा । इति राजनिर्घण्टः ॥

जरद्गवः, पुं, (जरंश्चासौ गौश्चेति । "गोरतद्धितलुकि ।"५ । ४ । ९२ । इति टच् ।) जीर्णवृषः । तत्पर्य्यायः । वृद्धोक्षः २ । इत्यमरः । २ । ६ । ६१ ॥ (यथा, पञ्चतन्त्रे । ४ । ८४ ।

"अकृत्य पौरुषं या श्रीः किं तयापि सुभोग्यया ।
जरद्गवः समश्नाति दैवादुपगतं तृणम् ॥"

जरन् क्षीयमाणो गौर्वृषरूपो धर्म्मः । धर्म्मरूपजीर्णवृषः । यथा, महाभारते । १३।९३।६८ ।

"नैतस्येह यथास्माकं शश्वच्छास्त्रं जरद्गवः ।
अलसः क्षुत्परो मूर्खस्तेन पीवाञ्छुना सह ॥")

गृध्रपक्षिविशेषः । यथा,—

"अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्ज्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥"

इति हितोपदेशे मित्रलाभपरिच्छेदः ॥

जरन्, पुं, (जरतीति । जॄ+शतृ ।) वृद्धः । इति राजनिर्घण्टः ॥

("वान्तमात्रे जरत् पित्तं शूलमाशु व्यपोहति ॥"

इति माधवकृतरुग्विनिश्चये शूलाधिकारे ॥)

जरन्तः, पुं, (जीर्य्यतीति । जॄ+"जॄविशिभ्यां झच् ।"उणां ।३।१२६। इति झच् ।) महिषः । वृद्धः । इति त्रिकाण्डशेषः ॥

जरसानः, पुं, (जीर्य्यति जराग्रस्तो भवतीति । जॄ वयोहानौ+"ऋन्दस्यसानच् शुजॄभ्याम् ।" उणां । २ । ८६ । इति असानच् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

जरा, स्त्री, (जीर्य्यत्यनया । जॄ+"षिद्‌भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इत्यङ् । "ऋदृशोऽङि गुणः ।" ७ । ४ । १६ । इति गुणः ।) वयःकृतश्मथमांसाद्यवस्थाभेदः । वार्द्धक्यम् । "जीर्य्यत्यनया जरा जॄ ष वयोहानौ षित्वात् ङः ऋदृशोर्ङ्गुरिति गुणः ।" इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । विस्रसा २ । इत्यमरः ।२।६।४१ ॥ सा तु कालकन्या । यथा,—

"कालकन्या जरा साक्षात् लोकस्तां नाभिनन्दति ।
स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः ॥"

इति श्रीभागवतम् ।